# .. mAtA amRitAnandamayI aShTottara shata nAmAvali ..

# ॥ माता अमृतानन्दमयी अष्टोत्तर शत नामावलि ॥

॥ ॐ अमृतेश्वर्यै नमः ॥

ध्यान श्लोकः ।

ध्यायामोधवलावगुण्ठनवतीं तेजोमयीं नैष्ठिकीम्
स्निग्धापाङ्गविलोकिनीं भगवतीं मन्दस्मित श्रीमुखीम् ।
वात्सल्यामृतवर्षिणीं सुमधुरं सङ्कीर्तनालापिनीम्
श्यामाङ्गीं मधुसिक्तसूक्तम् अमृतानन्दात्मिकामीश्वरीम् ॥

ॐ पूर्ण-ब्रह्म-स्वरूपिण्यै नमः ।
ॐ सच्चिदानन्द-मूर्तये नमः ।
ॐ आत्मारामाग्रगण्यायै नमः ।
ॐ योग-लीनान्तरात्मने नमः ।
ॐ अन्तर्मुख स्वभावायै नमः ।
ॐ तुर्य-तुङ्ग-स्थलीजुषे नमः ।
ॐ प्रभामण्डल-वीतायै नमः ।
ॐ दुरासद-महौजसे नमः ।
ॐ त्यक्त-दिग्वस्तु-कालादि-सर्वावच्छेद-राशये नमः ।१० ।
ॐ सजातीय-विजातीय-स्वीय-भेद-निराकृते नमः ।
ॐ वाणी-बुद्धि-विमृग्यायै नमः ।
ॐ शश्वदव्यक्त-वर्त्मने नमः ।
ॐ नाम-रूपादि शून्यायै नमः ।
ॐ शून्य-कल्प-विभूतये नमः ।
ॐ षडैश्वर्य-समुद्रायै नमः ।
ॐ दूरीकृत-षडूर्मये नमः ।
ॐ नित्य-प्रबुद्ध-संशुद्ध-निर्मुक्तात्म-प्रभामुचे नमः ।
ॐ कारुण्याकुल-चित्तायै नमः ।
ॐ त्यक्त-योग-सुषुप्तये नमः ।
ॐ केरलक्ष्मावतीर्णायै नमः ।२० ।
ॐ मानुषस्त्री-वपुर्भृते नमः ।
ॐ धर्मिष्ठ-सुगुणानन्द-दमयन्ती-स्वयंभुवे नमः ।
ॐ माता-पितृ-चिराचीर्ण-पुण्यपूर-फलात्मने नमः ।
ॐ निःशब्द-जननीगर्भ-निर्गमाद्भुत-कर्मणे नमः ।
ॐ काली-श्रीकृष्ण-सङ्काश-कोमल-श्यामल-त्विषे नमः ।
ॐ चिरनष्ट-पुनर्लब्ध-भार्गवक्षेत्र-सम्पदे नमः ।

ॐ मृतप्राय-भृगुक्षेत्र-पुनरुद्धित-तेजसे नमः ।
ॐ सौशील्यादि-गुणाकृष्ट-जङ्गम-स्थावरालये नमः ।
ॐ मनुष्य-मृग-पक्ष्यादि-सर्व-संसेविताङ्घ्रये नमः ।
ॐ नैसर्गिक-दया-तीर्थ-स्नान-क्लिन्नान्तरात्मने नमः ।३० ।
ॐ दरिद्र-जनता-हस्त-समर्पित-निजान्धसे नमः ।
ॐ अन्यवक्त्र-प्रभुक्तान्न-पूरित-स्वीय-कुक्षये नमः ।
ॐ सम्प्राप्त-सर्व-भूतात्म-स्वात्म-सत्तानुभूतये नमः ।
ॐ अशिक्षित-स्वयंस्वान्त-स्फुरत्-कृष्ण-विभूतये नमः ।
ॐ अच्छिन्न-मधुरोदार-कृष्ण-लीलानुसन्धये नमः ।
ॐ नन्दात्मज मुखालोक-नित्योत्कण्ठित-चेतसे नमः ।
ॐ गोविन्द-विप्रयोगाधि-दाव-दग्धान्तरात्मने नमः ।
ॐ वियोग-शोक-सम्मूर्च्छा-मुहु-पतित-वर्ष्मणे नमः ।
ॐ सारमेयादि-विहित-शुश्रूषा-लब्ध-बुद्धये नमः ।
ॐ प्रेमभक्ति-बलाकृष्ट-प्रादुर्भावित-शार्ङ्गिणे नमः ।४० ।
ॐ कृष्णालोक-महाह्लाद-ध्वस्त-शोकान्तरात्मने नमः ।
ॐ काञ्ची-चन्द्रक-मञ्जीर-वंशी-शोभि-स्वभू-दृशे नमः ।
ॐ सार्वत्रिक-हृषीकेश-सान्निध्य-लहरी-स्पृशे नमः ।
ॐ सुस्मेर-तन्-मुखालोक-विस्मेरोत्फुल्ल-दृष्टये नमः ।
ॐ तत्कान्ति-यमुना-स्पर्श-हृष्ट-रोमाङ्ग-यष्टये नमः ।
ॐ अप्रतीक्षित-संप्राप्त-देवी-रूपोपलब्धये नमः ।
ॐ पाणी-पद्म-स्वपद्वीण-शोभमानांबिका-दृशे नमः ।
ॐ देवी-सद्यः-तिरोधान-ताप-व्यथित-चेतसे नमः ।
ॐ दीन-रोदन-निर्घोष-दीर्ण-दिक्कर्ण-वर्त्मने नमः ।
ॐ त्यक्तान्न-पान-निद्रादि-सर्व-दैहिक-धर्मणे नमः ।५० ।
ॐ कुररादि-समानीत-भक्ष्य-पोषित-वर्त्मणे नमः ।
ॐ वीणा-निष्यन्दि-सङ्गीत-लालित-श्रुतिनालये नमः ।
ॐ अपार-परमानन्द-लहरी-मग्न-चेतसे नमः ।
ॐ चण्डिका-भीकराकार-दर्शनालब्ध-शर्मणे नमः ।
ॐ शान्त-रूपामृत-झरी-पारणे-निर्वृतात्मने नमः ।
ॐ शारदा-स्मारकाशेष-स्वभाव-गुण-संपदे नमः ।
ॐ प्रतिबिम्बित-चान्द्रेय-शारदोभय-मूर्त्तये नमः ।
ॐ तन्नाटकाभिनयन-नित्य-रङ्गयितात्मने नमः ।
ॐ चान्द्रेय-शारदा-केलि-कल्लोलित-सुधाब्धये नमः ।
ॐ उत्तेजित-भृगुक्षेत्र-दैव-चैतन्य-रंहसे नमः ।६० ।
ॐ भूयः प्रत्यवरुद्धार्ष-दिव्य-संस्कार-राशये नमः ।
ॐ अप्राकृताद्भुतानन्द-कल्याण-गुण-सिन्धवे नमः ।

ॐ ऐश्वर्य-वीर्य-कीर्ति-श्री-ज्ञान-वैराग्य-वेश्मने नमः ।
ॐ उपात्त-बालगोपाल-वेषभूषा-विभूतये नमः ।
ॐ स्मेर-स्निग्ध-कटाक्षायै नमः ।
ॐ स्वैराध्युषित-वेदये नमः ।
ॐ पिञ्छ-कुण्डल-मञ्जीर-वंशिका-किङ्किणी-भृते नमः ।
ॐ भक्त-लोकाखिलाभीष्ट-पूरण प्रीणनेच्छवे नमः ।
ॐ पीठारूढ-महादेवीभाव-भास्वर-मूर्तये नमः ।
ॐ भूषणाम्बर-वेशश्री-दीप्यमानाङ्ग-यष्टये नमः ।७० ।
ॐ सुप्रसन्न-मुखांभोज-वराभयद-पाणये नमः ।
ॐ किरीट-रशना-कर्णपूर-स्वर्णपटी-भृते नमः ।
ॐ जिह्व-लीढ-महारोगि-बीभत्स-व्रैणित-त्वचे नमः ।
ॐ त्वग्रोग-ध्वंस-निष्णात-गौराङ्गापर-मूर्तये नमः ।
ॐ स्तेय-हिंसा-सुरापानाद्यशेषाधर्म-विद्विषे नमः ।
ॐ त्याग-वैराग्य-मैत्र्यादि-सर्व-सद्वासना-पुषे नमः ।
ॐ पादाश्रित-मनोरूढ-दुस्संस्कार-रहोमुषे नमः ।
ॐ प्रेम-भक्ति-सुधासिक्त-साधु-चित्त-गुहाजुषे नमः ।
ॐ सुधामणि महानाम्ने नमः ।
ॐ सुभाषित-सुधामुचे नमः ।८० ।
ॐ अमृतानन्दस्मय्याख्या-जनकर्ण-पुटस्पृशे नमः ।
ॐ दृप्त-दत्त-विरक्तायै नमः ।
ॐ नम्रार्पित-बुभुक्षवे नमः ।
ॐ उट्सृष्ट-भोगि-सङ्गायै नमः ।
ॐ योगि-संग-रिरंसवे नमः ।
ॐ अभिनन्दित-दानादि-शुभ-कर्माभिवृद्धये नमः ।
ॐ अभिवन्दित-निःशेष-स्थिर-जंगम-सृष्टये नमः ।
ॐ प्रोत्साहित-ब्रह्मविद्या-सम्प्रदाय-प्रवृत्तये नमः ।
ॐ पुनरासादित-श्रेष्ठ-तपोविपिन-वृत्तये नमः ।
ॐ भूयो-गुरुकुलावास-शिक्षणोत्सुक-मेधसे नमः ।९० ।
ॐ अनेक-नैष्ठिक-ब्रह्मचारि-निर्मातृ-वेधसे नमः ।
ॐ शिष्य-सङ्क्रामित-स्वीय-प्रोज्वलद्-ब्रह्म-वर्चसे नमः ।
ॐ अन्तेवासि-जनाशेष-चेष्टा-पातित-दृष्टये नमः ।
ॐ मोहान्धकार-सञ्चारि-लोकानुग्राहि-रोचिषे नमः ।
ॐ तमः-क्लिष्ट-मनोवृष्ट-स्वप्रकाश-शुभाशिषे नमः ।
ॐ भक्त-शुद्धान्तरङ्गस्थ-भद्र-दीप-शिखा-त्विषे नमः ।
ॐ सप्रीति-भुक्त-भक्तौघन्यर्पित-स्नेह-सर्पिषे नमः ।
ॐ शिष्य-वर्य-सभा-मध्य ध्यान-योग-विधित्सवे नमः ।

ॐ शश्वल्लोक-हिताचार-मग्न-देहेन्द्रियासवे नमः ।
ॐ निजपुण्य-प्रदानान्य-पापादान-चिकीर्षवे नमः ।१०० ।
ॐ प्रस्वर्यापन-स्वीय-नरक-प्राप्ति-लिप्सवे नमः ।
ॐ रथोत्सव-चलत्-कन्याकुमारी-मर्त्य-मूर्तये नमः ।
ॐ विमोहार्णव-निर्मग्न-भृगु-क्षेत्रो-ज्जिहीर्षवे नमः ।
ॐ पुनस्सन्तानित-द्वैपायन-सत्कुल-तन्तवे नमः ।
ॐ वेद-शास्त्र-पुराणेतिहास-शाश्वत-बन्धवे नमः ।
ॐ भृगुक्षेत्र-समुन्मीलत्-परदैवत-तेजसे नमः ।
ॐ देव्यै नमः ।
ॐ प्रेमामृतानन्दमय्यै नित्यं नमो नमः ।१०८ ।
॥ ॐ अमृतेश्वर्यै नमः ॥

This is from The Archana Book.
Encoded and proofread by Michele snehikkyam at gmail.com
Sunder Hattangadi sunderh at hotmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org